# स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम्

[पूर्वाङ्कात् अनुवर्तते...]

अनुवादकः– ब्रह्मचारी अच्युतचैतन्यः

क्रमेण साधनानिष्ठस्य राखालस्य एवम् अवस्था सञ्जाता यत् दैनन्दिनकार्येषु अपि तस्य मनोनिवेशः अशक्योऽभवत्। इदं परिलक्ष्य ठाकुरः अवदत्—"राखालस्य स्वभावः क्रमश एवं परिवर्तते यत्, मया तस्मै जलमपि दातव्यं भवति; सेवाकर्मणि अपि तस्य मनो न तिष्ठति"। तदा संसारं प्रति तस्य वैराग्यभावः एवम् अवर्धत यत्, राखालः प्रायशः ठाकुरं निवेदयति स्म—"संसारः मह्यं निःसारः प्रतिभाति—मध्ये मध्ये त्वमपि मह्यं न रोचसे"।

क्रमेण वर्षत्रयं व्यतीतम्। समयेऽस्मिन् राखालः भूयः ज्वरेण आक्रान्तो भवति स्म। तस्मात् अनिच्छुकेनापि तेन मध्ये मध्ये कलिकातां गत्वा तत्रैव वासः क्रियते स्म। किन्तु स पितृगृहम् अगत्वा बलराममन्दिरे अथवा अधरसेनमहाशयस्य गृहे निवसति स्म। समयेऽस्मिन् तस्य चित्तेऽपि आलोडनमेकं जायमानम् आसीत्। ठाकुरः अवदत्—"तदा बालकवद् राखालस्य मनसि ईर्ष्यापि आसीत्। अतः मम मनसि मध्ये मध्ये तस्य विषये भीतिः जायते स्म। यतो हि, माता (जगदम्बा) यान् अत्र आनयति, कदाचित् तेषु ईर्ष्याभावाश्रयणात् तस्य अकल्याणं स्यादि"ति। नवागताः ठाकुरस्य स्नेहभाजः स्युः—इत्येतद् राखालः कथमपि न सहते स्म। अस्यां परिस्थितौ, एकदा श्रीरामकृष्णः भावचक्षुषा अपश्यत् यत्, अम्बा राखालम् अपसारयति इव; तदा झटिति व्याकुलः सन् मातरं प्रार्थयन् आह—"अम्ब, हृदयवत् तमपि मा अपसारय; अम्ब, स

बालिशः, बोद्धुं न शक्नोति—अतः मध्ये मध्ये अभिमानं करोति। यदि तव कार्यार्थम् इतः तम् अपसारयसि, तर्हि रम्ये प्रदेशे स्थापय यथा स आनन्देन तिष्ठेत्।" यद्वा भवतु, राखालः कलिकातानगरे भक्तगृहे कानिचन दिनानि आनन्देनैव यापितवान्। परन्तु सर्वविधयत्नेनापि स्वास्थ्यम् उल्लाघं नाभवत्। तस्मिन् समये एव बलराममहाभागः वृन्दावनं गन्तुम् उद्युक्तः आसीत्। स राखालं वृन्दावनं नेतुकामः इति ज्ञात्वा ठाकुरः सहर्षं तद् अनुमोदितवान्। तदनुसारेण चतुरशीत्यधिक-अष्टादश-शततमवर्षस्य सेप्टेम्बर-मासस्य प्रारम्भे राखालः व्रजधाम्नि उपस्थितः। सौन्दर्यनिलये भावगम्भीरे च व्रजधाम्नि राखालः विशिष्टम् आनन्दम् अन्वभवत्। इदम् एव श्रीकृष्णस्य लीलाभूमिः वृन्दावनम्! इदमेव तद् यमुनापुलिनम्! अत्र प्रतिकुञ्जं मयूरा मयूर्यश्च नृत्यन्तः विचरन्ति। स्वभावसुन्दरे धाम्नि प्रारम्भे कतिचन दिवसानि राखालस्य मनः तथा शरीरमपि स्वस्थम् एव आसीत्। परन्तु केभ्यश्चित् दिनेभ्यः परं पुनः ज्वरः तं रुजति स्म। वार्तामिमाम् आकर्ण्य उद्विग्नः श्रीरामकृष्णः अवदत्—"राखालः प्रकृत्यैव व्रजगोपबालः। यः यस्मात् स्थानाद् अवतीर्य शरीरं गृह्णाति, तत्र गमनेन प्रायशः तस्य शरीरं नश्येत्।" अत आकुलो भूत्वा जगज्जनन्यै न्यवेदयत्—"मातः, अनेन को वा लाभः? कृपया तं स्वस्थीकुरु; स गृहादिकं सर्वस्वं परित्यज्य मामेव आश्रितवान् खलु!"


माता ठाकुरस्य प्रार्थनां श्रुतवती। मासत्रयात् परं नवम्बर-मासस्य अन्तिमभागे पूर्वापेक्षया उल्लाघतां समासाद्य राखालः वृन्दावनात् प्रत्यावर्त्य पुनः ठाकुरस्य सेवायां लग्नः अभवत्। किन्तु दैवक्रमेण मासेभ्यः परं स पुनः अस्वस्थः सञ्जातः। ठाकुरोऽपि तदा कफादिरोगैः पीडितः आसीत्। राखालः जानाति स्म यत्, ठाकुरः तस्य विषये सदा चिन्तितः भवति। अतो दुर्बलेन शरीरेण दक्षिणेश्वरे अवस्थीयते चेत् ठाकुरस्य उद्वेगवृद्धिः एव भविष्यति। तादृशी दुश्चिन्ता यथा मा भूत् तथा आचरणीयम्—इत्येवं विचिन्त्य स ठाकुरं मनोगतभावम् असूचयित्वा

एव पित्रालयं प्रतिनिवृत्तः, सम्पूर्णस्वास्थ्यलाभस्य आशया च तत्रैव अवस्थितिम् अकरोत्।

अस्माभिः पूर्वमेव उक्तं यत्, गृहं प्रतिगन्तुम् अनिच्छन्तमपि राखालं मध्ये मध्ये गृहं प्रेष्य ठाकुरः हृतशावका विहङ्गी इव कष्टेन व्याकुलीभवति स्म। प्रथमतो निषेधतः अपि राखालस्य गृहे गमनागमनं तथा तत्र अवस्थितिकालश्च क्रमेण अवर्धत, तदा विश्वेश्वर्या सह तस्य व्यवहारादिकमपि प्रायः स्वाभाविकमेव सञ्जातम्। ठाकुरः अवादीत्—"अहमेव तं तस्य परिवारस्य समीपे प्रेषयामि स्म—अल्पः भोगः अवशिष्टः आसीत् किल।" राखालस्य स्वाभाविकं व्यवहारादिकं दृष्ट्वा आत्मीयाः सर्वे आश्वस्ताः सन्तः तं कर्मसु प्रवर्तयितुम् अचेष्टन्त। राखालेन अस्यां वार्तायां निवेदितायां ठाकुरः उक्तवान्—"ईश्वरप्राप्तये गङ्गायां निमज्जनेन मरणं जातमित्यपि वरम्, परन्तु जीविकायै कस्यापि दासः अभवः, वृत्तिभोगी वा सञ्जातः—इति कदापि न शृणुयाम्।" परन्तु स्वजना अपि न त्यक्तवन्तः, ते विपरीतयुक्तिं प्रदर्शितवन्तः, स्वस्य कृते न क्रियते चेदपि परिजनानां कृते अर्थोपार्जनम् अपेक्षितम्, कारणं परिजनेषु उत्तरदायित्वं वर्तते खलु। ततः सारल्येन राखालः ठाकुरं पृष्टवान्—"मम भार्यायाः किं भविष्यति" इति। प्रश्ने पृष्टे सति ठाकुरं निरुत्तरम् अवेक्ष्य राखालः चिन्तान्वितः अभवत्। यद्वा भवतु, अगत्या स्वास्थ्यस्य उन्नत्यै अथवा दैवात् अवशिष्टस्य भोगस्य भुक्तये एव वा तदा सन्दिग्धमनाः राखालः गृहे एव निवसति स्म। अपरतः ठाकुरः प्रसङ्गक्रमेण अन्यान् भक्तान् उक्तवान्—"राखालः अवसरकालिकवृत्तिम् उपभुङ्क्ते—वृन्दावनतः प्रत्यागत्य इदानीं स्वगृहे तिष्ठति।" इत्थं राखालः स्वगृहे कानिचन दिनानि व्यतीत्य स्वास्थ्यलाभमात्रेणैव दक्षिणेश्वरं पुनरागतवान्।

अस्मिन् समये श्रीमान् महिमाचरणचक्रवर्तिमहाभागः न्यवेदयत् यत् ठाकुरस्य पुरतः ब्रह्मचक्रं विरचय्य साधनायाः अभिलाषः जातः इति। ततः ठाकुरस्य अनुमतिक्रमेण तस्यैव कक्षे कृष्णचतुर्दश्याः गभीररात्रौ राखाल-मास्टार-

किशोरी-प्रभृतीन् आदाय महिमाचरणमहाभागो ध्यानार्थम् उपाविशत्। ध्यानेन भावावस्थायाम् उपस्थितौ सत्यां ठाकुरः राखालस्य वक्षःस्थले हस्तसञ्चालनेन तस्य बाह्यप्रत्ययं प्रत्यानीतवान्। इतः दिवसद्वयात् परं ठाकुरः मौनी अभवत्, तदवस्थातः प्रत्यागत्य उक्तवान्—"अम्बा दर्शयन्ती आसीत्—भक्तेषु कस्य कियद् जातम्।" जिज्ञासिते सत्यपि सः अधिकं किमपि नावादीत्। परं शरत्-महाराजं प्रति ठाकुरः अवदत्—"राखालस्य विषये माता बहु किमपि अदर्शयत्। परन्तु तद्विषये अधिकम् आलोचनं निषिद्धं वर्तते।"



[बेलुडमठे स्वामिब्रह्मानन्दमन्दिरे गोपालविग्रहस्य चित्रम्]